## संस्कृत-वार्ता:

**दिनाङ्क : 29/03/2026**

**सायम् - 06:20**

**इयम् आकाशवाणी**

**सम्प्रति: वार्ता: श्रूयन्ताम्**

-

## आदौ मुख्यवार्ता:

• प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य उक्तं यत्, पश्चिम-एशियायाः संघर्षेण समाह्वान-पूर्णसमयः निर्मित: । तेन विश्वास: प्रकटित: यत् देश: संघर्षकालजयी भूत्वा उदेष्यति।

• आकाशवाण्यां मन-की-बात इति कार्यक्रमे प्रधानमन्त्री-नरेन्द्रमोदी जनान्, मिथ्या वार्त्ताभिः भ्रमितं मा भवितुं, सर्वकारेण दत्तसूचनां प्रति विश्वसितुं च उक्तवान्।

• प्रधानमन्त्री-नरेन्द्रमोदी एककोट्यधिकानां भारतीय-प्रवासिनां कृते सर्वविध-साहाय्यं प्रदातुं गल्फ्-देशान् प्रति कृतज्ञतां प्रकटितवान्।

• वर्धमानेन संघर्षेण सहैव इस्राएल-देशेन तेहरान-नगरे महत्वपूर्णानि सैन्य-आधारभूत-संरचनानि लक्ष्यीकृत्य प्रक्षेपणास्त्र-ड्रोन चोभाभ्यां आक्रमणानि आरब्धानि। अमरीकी-देशेन च पश्चिम-एशिया क्षेत्रे पञ्चत्रिंशतशताधिक नौसैनिक-दलानाम् आगमनस्य घोषणा कृता।

**अपि च,**

● आई. पी. एल. क्रिकेट्-स्पर्धायाम् अद्य सायङ्काले मुम्बई-नगरस्य वानखेडे-क्रीडाङ्गणे मुम्बई-इण्डियन्स दलं, कोलकाता-नाईट-राईडर्स् दलं सम्मुखी करिष्यति।

## अथ वार्ता: विस्तरेण

### प्रधानमंत्री-मन की बात

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य उक्तं यत्, पश्चिम-एशियायाः संघर्षेण समाह्वान-पूर्णसमयः निर्मितः । यतः अयं प्रदेशः भारतस्य ऊर्जा-आवश्यकतानां प्रमुखकेन्द्रम् अस्ति। आकाशवाण्यां स्वस्य मन की बात् इत्यस्मिन् कार्यक्रमे राष्ट्रम् अभिसंबोधयन्, श्रीमोदी दृढविश्वासं प्रकटितवान् यत् राष्ट्रम् कोविड्-19 महामार्याः समये यथा समाह्वानां समापयत् तथैव समापयिष्यति।

अस्मिन् काले एककोट्यधिकानां भारतीय-प्रवासिनां कृते सर्वविध-साहाय्यं प्रदत्तं अतः प्रधानमन्त्री गल्फ्-देशान् प्रति कृतज्ञतां प्रकटितवान्। श्रीमोदी अस्य विषयस्य राजनीतिकरणाय सावधानं कृतवान्, किंवदन्तयः राष्ट्रिय-हिताय हानिं जनयितुं शक्नुवन्ति। सः जनान्, मिथ्या वार्त्ताभिः भ्रमितं मा भवितुं, सर्वकारेण दत्तसूचनां प्रति विश्वसितुं च उक्तवान्।

मासिककार्यक्रमे, प्रधानमन्त्री मोदी जनसहभागित्वेन भारतस्य समृद्धसांस्कृतिकपरम्परायाः अभिलेखार्थं आयोजिते ज्ञानभारतं सर्वेक्षणस्य विषये उक्तवान्। उपक्रमस्य अस्य उद्देश्यं सम्पूर्णे देशे पाण्डुलिप्याः विषये सूचनां सङ्गृहितुम् अस्ति। जून्-मासस्य मध्यभागपर्यन्तं सर्वेक्षणम् अनुवर्तते। सर्वेक्षणेन सर्वेभ्यः स्वस्य परम्परायाः विषये सूचितुं श्रीमोदी आग्रहम् अकरोत्।

राष्ट्रनिर्माणक्षेत्रे यूनः समावेशयितुं माय भारतस्य भूमिकायाः प्रशंसां कुर्वन् प्रधानमन्त्री, विभिन्नेषु उपक्रमेषु महती सहभागिता उदघोषितवान्। सः विकासस्य, कृषकाणां कल्याणस्य, महिलानां नेतृत्वस्य विकासस्य च विषये यूनः योगदानानां प्रशंसाम् अकरोत्।

प्रधानमन्त्री जलसंरक्षणविषये अपि उक्तवान्। सः अवदत् यत् देशस्य अनेकेषु भागेषु ग्रीष्मकालस्य आरम्भेन जलसंरक्षणार्थं प्रतिबद्धतां नवीनीकर्तुं समयः आगतः अस्ति।

मन की बात् इत्यस्मिन् कार्यक्रमे प्रधानमन्त्री मोदी अवदत् प्रवासिनां जीवनं परिष्कारयितुं सर्वकारः अनेकान् उपक्रमान् कुर्वन् अस्ति, तान् आत्मनिर्भर भारतस्य दृढः स्तम्भः इति वर्णितवान् । उत्तरप्रदेशस्य वाराणसी-नगरे एकहोरायां एकपञ्चाशत् सहस्राधिक द्विलक्षतोप्यधिकाः वृक्षाः रोपिताः, येन गिन्निस्-वर्ल्ड्-अभिलेखः निर्मितः इति उल्लिखितवान्। विंशतिं प्रति विंशति विश्वचषक विजयः, जम्मू-कश्मीरस्य प्रथमः रणजी-ट्रोफी-विजयः इत्यादीनां भारतस्य सद्यैव क्रीडा-उपलब्धीनां प्रशंसां कुर्वन् प्रधानमन्त्री मोदी तेषां निरन्तरप्रयासस्य प्रतिभायाः च परिणामम् इति उक्तवान्।

**अमितशाहः-असम-निर्वाचनम्**

भाजपेति दलस्य वरिष्ठः नेता तथा केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य अवदत् यत्, भाजपेति दलेन असम-राज्ये अवैधप्रवासिनाम् आगमनं स्थगितम्, आगामिषु पञ्चवर्षेषु तेषां निर्वासनार्थं कार्यं करिष्यति। सः अद्य अपराह्णे सोनितपुर-जनपदस्य ढेकियाजुल्यां निर्वाचनसमारोहं सम्बोधयन् आसीत्। श्रीशाहः अवदत् यत्, अवैधप्रवासिनां निर्वासनं महत्त्वपूर्णम् अस्ति, ते राज्यस्य मूलनिवासिनां संसाधनेषु पीडनं कुर्वन्ति। भाजपा-सर्वकारस्य उपलब्धयः प्रकाशयन्, श्रीशाहः अवदत् यत्, गतदशवर्षेषु असम-

प्रदेशः सामूहिकरूपेण विद्रोहात् मुक्तः अभवत्, येन अस्मिन् प्रदेशे शान्तेः, नूतनानां अवसराणां च आगमनम् अभवत्। सः काङ्ग्रेस-दलं स्वस्य कार्यकाले विधि-व्यवस्थां निर्वोढुं असफलः अभवत् इति आरोपितवान्, यस्य परिणामेन शतशः यूनां प्राणहानिः अभवत् इति सः अवदत्। प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वस्य उल्लेखं कुर्वन्, श्रीशाहः अवदत् यत्, अनेकेषु शान्ति-सन्धिषु हस्ताक्षराणि कृतानि, येन अस्मिन् प्रदेशे स्थिरता पुनः आगता। सः अवदत् यत्, प्रायः दशसहस्रं यावत् उग्रवादिभिः स्वशस्त्राणां समर्पणं कृतवन्तः, येन चिरस्थायी शान्तिः आगता। असम-राज्ये भाजपेति दलस्य कार्यकाले कार्यान्विताः विभिन्नाः विकास-कल्याणकारी-उपक्रमाः अपि श्रीशाहेन अधोरेखितम्। भाजपा-दलस्य वरिष्ठः नेता तथा वर्तमानः विधायकः अशोकसिङ्घलः अस्य निर्वाचनक्षेत्रात् नामाङ्कितः अस्ति।

**खाड़ी देशे-सञ्चेतना**

तेहरान-नगरस्य प्रमुखेषु सैन्य-आश्रयेषु इस्रायलदेशस्य आक्रमणैः, खाति◌-प्रदेशे च ईरानदेशस्य प्रक्षेपास्त्र-ड्रोन इत्येतयोः आक्रमणैः संघर्षः वर्धितः। इस्राएल-देशेन ईरान-देशस्य राजधान्यां तेहरान-नगरे सैन्य-संरचनां लक्ष्यीकृत्य आक्रमणानि कृतानि। इस्राएल-देशस्य रक्षाबलैः सामाजिक-माध्यमेन उक्तम् यत् एतेषु आक्रमणेषु ईरान-देशस्य आयुध-भण्डाराणि तथा उत्पादन-केन्द्राणि लक्ष्यीकृतानि। अस्थायी- केंद्रेषु , बैलिस्टिक-प्रक्षेपास्त्र-केंद्रेषु , वायु-रक्षा-प्रणालिषु आक्रमणानि सञ्जातानि। वार्तानुसारेण अनेकाः सेनानायकाः निहताः। अस्मिन्नेव क्रमे खाति क्षेत्रे रक्षाबलानि उच्चसतर्कतायां स्थितानि सन्ति, यतः ईरान-देशेन संयुक्त अरब अमीरात, कुवैत तथा बहरीन चेत्यादीनां देशानां उपरि प्रक्षेपणास्त्र-ड्रोन-चोभाभ्यां आक्रमणानि विहितानि। एतानि आक्रमणानि ईरानस्य इस्पात-उद्योगेषु पूर्वं कृतानां अमेरिका-इजरायलयोः -आक्रमणानां प्रत्युत्तररूपेण कृतानि।

**आईपीएल-क्रिकेट्क्री□**

आई. पी. एल. क्रिकेट्-स्पर्धायां अद्य सायङ्काले मुम्बई-नगरस्य वानखेडे-क्रीडाङ्गणे मुम्बई-इण्डियन्स दलं, कोलकाता-नाईट-राईडर्स् दलं सम्मुखी करिष्यति। स्पर्धा सायं सार्द्ध सप्तवादने आरभ्यते। उभौ अपि दलौ स्वस्याः अभियानस्य आरम्भं विजयरूपेण कर्तुं प्रयतेते। गतरात्रौ, ऊनविंशति तमस्य सत्रस्य आरम्भिकक्रीडायां, रायल चालेञ्जर्स् बेङ्गलूरु दलेन, सनराईजर्स हैदराबाद दलं षट् स्तोभैः पराजितम्।

**।। इति वार्ताः ।।**